तिङन्तप्रक्रिया – अभ्यासः ११ – पाठः १५

धातुषु इत्संज्ञा, प्राकृतिककार्याणि

एतेषां धातूनाम् इत्संज्ञकवर्णान् अभिज्ञाय लोपयत। प्राकृतिककार्याणि (सत्वम्, नत्वम्, नुमागमः, उपधादीर्घः) कृत्वा किं रूपं भवति इति निर्दिशत।

Example:

वदिँ

वद् ('उपदेशेऽजनुनासिक इत्' १.३.२, 'तस्य लोपः' १.३.९)

वन् द् ('इदितो नुम् धातोः' ७.१.५८)

वंद् ('नश्चापदान्तस्य झलि' ८.३.२४)

वन्द् ('अनुस्वारस्य ययि परसवर्णः' ८.४.५८)

१. उर्वीँ – ऊर्व्। उपधायां च (७.२.७८)
२. इविँ – इन्व्। इदितो नुम् धातोः (७.१.५८)
३. ष्टुङ् – स्तु। धात्वादेः षः सः (६.१.६४)
४. ष्णौ – स्नै। धात्वादेः षः सः (६.१.६४)
५. लघिँ – लङ्घ्। इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४), अनुस्वारस्य ययि परसवर्णः (८.४.५८)
६. ष्ठलँ - स्थल्। धात्वादेः षः सः (६.१.६४)
७. स्पदिँ – स्पन्द्। इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४), अनुस्वारस्य ययि परसवर्णः (८.४.५८)
८. कपिँ – कम्प्। इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४), अनुस्वारस्य ययि परसवर्णः (८.४.५८)
९. षुञ् – सु। धात्वादेः षः सः (६.१.६४)

१०.महिँ – मंह्। इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४)

११.षिञ् – सि। धात्वादेः षः सः (६.१.६४)

१२.गुर्वीँ – गूर्व्। उपधायां च (७.२.७८)

१३.णिदिँ – निन्द्। णो नः (६.१.६५)

१४.षञ्जँ – सञ्ज्। धात्वादेः षः सः (६.१.६४)

१५.शुठिँ – शुण्ठ्। इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४), अनुस्वारस्य ययि परसवर्णः (८.४.५८)

१६.षिधूँ – सिध्। धात्वादेः षः सः (६.१.६४)

१७.णुदँ – नुद्। णो नः (६.१.६५)

१८.मुर्छाँ – मूर्छ्। उपधायां च (७.२.७८)

१९.ष्ठिवुँ – ष्ठीव्।

२०.ञिष्वप् – स्वप्। धात्वादेः षः सः (६.१.६४)

२१.णिजिँ – निञ्ज्। णो नः (६.१.६५) इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४), अनुस्वारस्य ययि परसवर्णः (८.४.५८)

२२.षस्तिँ – संस्त्। धात्वादेः षः सः (६.१.६४) इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४)

२३.षो – सो। धात्वादेः षः सः (६.१.६४)

२४.षणुँ – सन्। धात्वादेः षः सः (६.१.६४)

२५.लबिँ – लम्ब्। इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४), अनुस्वारस्य ययि परसवर्णः (८.४.५८)

२६.णिसिँ – निंस्। णो नः (६.१.६५) इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४)

२७.षद्लृँ – सद्। धात्वादेः षः सः (६.१.६४)

२८.णुदँ – नुद्। णो नः (६.१.६५)

२९.हिसिँ – हिंस्। इदितो नुम् धातोः (७.१.५८), नश्चापदान्तस्य झलि (८.३.२४)

३०.ष्णिहँ – स्निह्। धात्वादेः षः सः (६.१.६४)